# अथाष्टमाध्याये प्रथमः पादः॥

## सर्वस्य द्वे। १। नित्यवीप्सयोः। ४।

कथम् एकश इति। अनेन द्वित्वप्राप्तेः। उच्यते: शसा[1] वीप्साया अभिधानात्। एवं[2] पदान्य् एकैकशस् तिङाम् इति प्रयोगमुखम्[3] तथा एकैकशः संख्यातानीति[4] कामन्दकं[5] न घटते एकैकशो देहीति भाष्यं च सर्वस्य द्वे इत्य् अत्र। एवं च[6] तान्य् एकवचनद्विवचनबहुवचनान्य् एकश इति निर्देशाद्[7] अद्वित्वं भाष्यप्रामाण्याद् द्वित्वं[8] च[9]॥

## उपर्यध्यधसः सामीप्ये। ७।

कथम् उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति[10]। सामीप्याभावाद् द्वित्वानुपपत्तेः। उच्यते: उपरिबुद्धीनाम् उत्तरलबुद्धीनाम् उपर्य् ऊर्ध्वम्[11] ईश्वरबुद्धयश् चरन्तीत्य् अर्थः। न तु द्वित्वम्॥

## प्रकारे गुणवचनस्य। १२।

कथं भीतभीत इव शीतमयूख इति भारविः। इवशब्देन सादृश्यस्योक्ते[12] द्वित्वाभावात्। उच्यते: आधिक्ये द्वे[13] इति वार्त्तिकेनात्र द्वित्वं भीतत्वाधिक्यं द्वित्वेनोच्यत इति[14]। यथा दर्शनीय[15] दर्शनीया मह्यं[16] रोचत इत्य् अत्र दर्शनीयताया[17] रुचेश्[18] चाधिक्यं[19] द्विर्वचनात्[20] प्रतीयत इति भाषावृत्तिः।

कथं नवं नवं प्रीतिर् अहो करोतीति[21] माघः। अनेन द्विरुक्तौ[22] कर्मधारयवद् उत्तरेष्व् इति कर्मधारयवत्त्वात्[23] सुब्लुक्प्राप्तेः। यथा माघ[24] एव[25] नवनवा वनवायुभिर् आदधे तथा[26] नवनवत्वम् इयाय वनश्रीर्[27] वस्तुम् इच्छति निरापदि सर्व इति भारविः। उच्यते: अकारप्रश्लेषो[28] त्र दृष्टव्यः। तद् अयम् अर्थः: प्रीतिर्[29] अनवं[30] चिरन्तनम् अपि नवं तनोतीत्य् अहो[31] आश्चर्यम् एतत्[32]।

कथं मन्दं मन्दं नुदति पवन इति मेघः। तथा[33] मन्दं मन्दं स्पृशति हरिणीशङ्कया साहसाङ्कम्[34] इत्य्[35] अभिनन्दः। पूर्ववल् लुक्प्राप्तेः। तथा मन्दं मन्दम् उदितः प्रययौ खम् इति भारविः।

1. शंसा g. 2. *om.* g. 3. °खी V (प्रयोगो [मु? न्मु] ख). 4. संहता वा इति V. 5. °अकीयं V. 6. (सहि? तर्हि) GŚ. 7. °शःउ(च्यते) g, *qui omet* अद्वित्वं, °शा(द)द्वि° GŚ. 8. °या(द् द्वित्वं) GŚ. 9. वा g. 10. *om.* V. 11. *om.* V. 12. °क्तत्वाद् V. 13. वा g; V *add.* भवत (:). 14. *om.* V. 15. *om.* g. 16. अद्य V. 17. °नीय(ता)या GŚ. 18. *om.* V. 19. च *om.* V. 20. सदेव *praepos.* g. 21. तनोतीति g. 22. द्वित्वोक्तौ g. 23. वत् *om.* g. 24. *om.* g. 25. *om.* g. 26. *om.* V. *qui ajoute* प्रियतमे. 27. *om.* V. *jusqu'à* भारविः 28. प्र *om.* g. 29. प्रीति g. 30. वनं g. 31. *om.* g. 32. *om.* g. 33. *om.* g. 34. *om.* g. 35. *om.* V. *jusqu'à* अभावात्